# A-II/1/1410/22

## तृतीयसत्रार्द्धम्

## प्रथमपत्रम्

## मीमांसा

**समयः घण्टात्रयम्** **पूर्णाङ्काः 80**

**अ. सर्वे अतिलघूत्तरीयाः प्रश्नाः समाधेयाः।** **(15×2=30)**

1. 'जातिः प्रतिपिण्डं न भिद्यते' कुतः?
2. शाक्तः जातिविषये किमाहुः?
3. जातिव्यक्त्योः सम्बन्धः कीदृशः?
4. सामान्यविशेषयोः का परिभाषा?
5. अपोहवादो नाम कः?
6. कः प्रतिषेधः?
7. नेक्षेत इत्यादौ पर्युदासाङ्गीकारः कुतः?
8. गोशब्दार्थः कः?
9. कीदृशं रूपं शब्दात् बुद्धौ भासते? कीदृशं न भासते?
10. चित्रायागस्य फलसम्बन्धबोधकं वाक्यं लिखत।
11. शब्दार्थयोः कीदृशः सम्बन्धः अभिमतः?

**अथवा**

शब्दार्थयोः सम्बन्धः कः?

12. ऊर्णनाभिरपि केन विना सृष्टुं न प्रभवति?

**अथवा**

मीमांसा-शास्त्रे कीदृशः सृष्टिक्रमः अभ्युपगम्यते?

13. सृष्टिविषये वैशेषिकाः किमभिप्रायकाः?

**अथवा**

के आरम्भवादिनः?

14. सांख्याभिमतं मोक्षस्वरूपं लिखत।

**अथवा**

अव्यतिरेकश्च इत्यत्र वृत्तिकारेण प्रदर्शितं व्याख्यानं किम्?

15. व्रीहीन् प्रोक्षतीति वाक्येन किं प्रतीयते?

**अथवा**

आत्मवादस्य उपक्रमे हेतुं दर्शयत।

**ब. सर्वे लघूत्तरीया: प्रश्ना: समाधेया:।** **(5×6=30)**

16. आकृतिवादसारं वर्णयत।

17. शब्दार्थयो: सम्बन्धविषये भट्टपादमतमनुवदत।

**अथवा**

वैशेषिकमवलम्ब्य सृष्टिक्रमं वर्णयत।

18. भगवत: इच्छामात्रेण जगन्निष्पत्ति: भवति ने वेति विवेचयत।

19. 'ज्ञानाग्नि: सर्वकर्माणि भस्मसात् कुरुते' इति वचनं किम् अभिप्रैति? इति विवेचयत।

**अथवा**

चित्राक्षेपवादं व्याख्यात।

20. अपोहवादमनूद्य खण्डयत।

**अथवा**

'अधिकारो बन्धहेतु:' अस्मिन् विषये मीमांसकानाम् आशयं प्रकटीकुरुत।

**स. एकस्य निबन्धात्मकमुत्तरं लिखत।** **(1×20=20)**

21. विधिवाद:

**अथवा**

श्लोकवार्त्तिके स्थितानां न्यायानाम् उपादेयता।

**अथवा**

देहातिरिक्त: आत्मा अस्ति न वा इति विमृशत।

# A-II/2/1411/22

## तृतीयसत्रार्द्धम्

## द्वितीयपत्रम्

## मीमांसा

**समयः घण्टात्रयम्** **पूर्णाङ्काः 80**

**अ. सर्वे अतिलघूत्तरीयाः प्रश्नाः समाधेयाः।** **(15×2=30)**

1. तृतीयाध्यायार्थः कः? प्रथमपादार्थश्च कः?
2. 'अथ' शब्दः केषु अर्थेषु लोके प्रसिद्धः?
3. 'स्वर्गाङ्गं यागः' कथम्?
4. 'तेषामर्थेन सम्बन्धः' इति सूत्रार्थसारं लिखत।
5. सान्नय्यधर्मान् आज्यधर्माञ्च लिखत।
6. कः अनारभ्यविधिः? उदाहरणमपि प्रदर्शयत।
7. स्फ्याधिकरणस्य विनियोगस्वरूपं किम्?
8. अरुणाधिकरणविषयवाक्यार्थं वर्णयत।

**अथवा**

अरुणाशब्दार्थं सप्रमाणं दर्शयत।

9. पिङ्गाक्षीशब्दार्थः कः?
10. ग्रहैकत्वाधिकरणस्य पूर्वाधिकरणेन सह का सङ्गतिः?

**अथवा**

ग्रहैकत्वाधिकरणन्यायस्वरूपं प्रदर्शयत।

11. समानाभिधानश्रुतिमुदाहृत्य विनियोगं दर्शयत।

**अथवा**

एककर्मकत्वं नाम किमुच्यते?

12. सक्तून् जुहोतीत्यत्र कः वाक्यार्थनिर्णयः?

**अथवा**

पश्वेकत्वाधिकरणन्यायः कः?

13. षष्ठीश्रुत्या विनियोगं दर्शयत।

**अथवा**

अभिक्रमणाधिकरणस्य विषयसंशयौ प्रदर्शयत।

14. प्रयाजयागविधायकानि वाक्यानि लिखत।

15. तृतीयाध्याये प्रथमद्वितीयपादयोः सम्बन्धं दर्शयत।

**ब. सर्वे लघूत्तरीयाः प्रश्नाः समाधेयाः।** **(5×6=30)**

16. बादर्यधिकरणमारचयत।

17. 'शेषः परार्थत्वात्' सूत्रार्थं यथाग्रन्थं व्याख्यात।

**अथवा**

स्फ्याधिकरणमारचयत।

18. ग्रहैकत्वाधिकरणसिद्धान्तं वर्णयत।

**अथवा**

वारणाधिकरणे भाष्यकारस्य अभिप्रायं दर्शयत।

19. आग्नेयं चतुर्धा करोतीत्यादौ विषयं व्याख्यात।

20. सूक्तवाक्यस्य विभज्यविनियोगविचारं व्याख्यात।

**अथवा**

लिङ्गप्रमाणेन विनियोगप्रकारं सोदाहरणं विवृणुत।

**स. एकस्य निबन्धात्मकमुत्तरं लिखत।** **(1×20=20)**

21. शेषलक्षणविश्लेषणम्।

**अथवा**

अरुणाधिकरणसारः।

**अथवा**

श्रुत्या विनियोगप्रकाराः।

# A-II/3/1412/22

## तृतीयसत्रार्द्धम्

## तृतीयपत्रम्

## मीमांसा

**समय: घण्टात्रयम्** **पूर्णाङ्का: 80**

**अ. सर्वे अतिलघूत्तरीयाः प्रश्नाः समाधेयाः।** **(15×2=30)**

1. 'धर्मः क्षरति कीर्तनात्' अस्य वाक्यस्य आशयः कः ?
2. सम्प्रश्नप्रार्थनयोः केन रूपेण भावनायामन्वयः ?
3. धर्माधर्मौ किं रूपौ ?
4. ज्ञानस्यापि धर्मशब्दप्रयोगः कदा उपपद्यते ?
5. किं नाम अखण्डोपाधित्वम् ?
6. 'लोट् च' इति सूत्रार्थः कः ?
7. किं नाम अध्ययनम् ?
8. 'सत्त्वप्रधानानि नामानि' अस्य कोऽर्थः ?
9. निन्दार्थवादानां कथमन्वयसिद्धिः ?
10. किं नाम प्रवर्तनात्वम् ?
11. शाब्दी भावना का ?

**अथवा**

प्रैषपदार्थं ग्रन्थरीत्या प्रदर्शयत।

12. यत्र विधिसन्निधौ अर्थवादः न श्रूयते तत्र का व्यवस्था ?

**अथवा**

का नाम वाक्यैकवाक्यता ?

13. निन्दार्थवादमुदाहरत।

**अथवा**

कर्तृलाभः मीमांसानये कथम् ?

14. भावनालक्षणं प्रदर्शयत।

**अथवा**

किं नाम करणत्वम्?

15. पशुना इत्यादौ संख्यायाः कारकाङ्गत्वे प्रमाणं किम्?

**अथवा**

सत्त्वपदार्थं वर्णयत।

**ब. सर्वे लघूत्तरीयाः प्रश्नाः समाधेयाः।** **(5×6=30)**

16. धर्माधर्मयोः लक्षणं विवेचयत।

17. नित्यकर्मविधौ लिङर्थं निरूपयत।

**अथवा**

विध्यर्थविषये मण्डनमिश्रपार्थसारथिमतं प्रदर्शयत।

18. अभ्यनुज्ञाविधिविषयः धर्मः उत अधर्म इति परिशीलयत।

**अथवा**

प्रेरणावादे पाणिनिमतं प्रदर्शयत।

19. धात्वर्थस्य भावनायामन्वयप्रकारं वर्णयत।

**अथवा**

गौणार्थकवादैः स्तुतिलक्षणाप्रकारं निरूपयत।

20. लकारार्थान् तदन्वयप्रकारं च निरूपयत।

**स. दीर्घोत्तरीयः प्रश्नः समाधेयः।** **(1×20=20)**

21. मीमांसासम्मतं लिङर्थं निरूपयत।

**अथवा**

भावनामुख्यविशेष्यकशाब्दबोधं वर्णयत।

**अथवा**

भाट्टरहस्यग्रन्थवैशिष्ट्यं वर्णयत।

# A-II/4/1413/22

## तृतीयसत्रार्द्धम्

## चतुर्थपत्रम्

## मीमांसा

**समय: घण्टात्रयम्** **पूर्णाङ्का: 80**

**अ. सर्वे अतिलघूत्तरीया: प्रश्ना: समाधेया:।** **(15×2=30)**

1. दर्शपदस्य व्युत्पत्तिं प्रदर्शयत।
2. वपनकाल: क:?
3. सर्पिर्धानस्य क: उपयोग:?
4. वेदिनिष्पत्तिक्रमं प्रदर्शयत।
5. पिण्डपितृयज्ञस्य अनुष्ठानकालं फलं च निर्दिशत।
6. उपवेषो नाम क:?
7. यागहोमयो: अर्थं वर्णयत।
8. प्रैषपदार्थ: वर्णनीय:?
9. के निगदा:? कस्मिन् वेदे तेषामन्तर्भाव:?
10. अनुमार्जनस्य क: काल:?
11. मदल्य: इत्यस्य कोऽर्थ:?

**अथवा**

समीक्षणपदार्थं प्रदर्शयत।

12. अपूर्वविधिं सोदाहरणं लिखत।

**अथवा**

उत्करपदेन किमभिधीयते?

13. उपसमस्यतीति कस्मिन्नर्थे शब्दोऽयं प्रयुज्यते?

**अथवा**

का: व्याहृतय:?

14. परिवासनपदार्थं व्याख्यात।

**अथवा**

अर्थकर्म सोदाहरणं विवृणुत।

15. श्रुतिक्रममुदाहरत।

**अथवा**

दशयज्ञायुधानि कानीति प्रदर्शयत।

**ब. सर्वे लघूत्तरीयाः प्रश्नाः समाधेयाः।** **(5×6=30)**

16. दर्शपूर्णमासप्रकरणं व्याख्यात।

17. सङ्कल्पस्य स्वरूपं विवेचयत।

**अथवा**

'अधिवृक्षसूर्ये वा पिण्डपितृयज्ञेन चरसि' सप्रसङ्गं व्याख्यात।

18. सप्तपाकयज्ञसंस्थाः इति व्याख्यात।

**अथवा**

अग्नीन् परिस्तीर्य अग्निमग्नी वा इति सूत्रस्य व्याख्यां कुरुत।

19. 'चतुर्जुह्वां अष्टावुपभृति चतुध्रुवायाम्' व्याख्यात।

20. चयनप्रक्रियां विवृणुत।

**अथवा**

विधित्रैविध्यं निरूपयत।

**स. एकस्य विवरणात्मकमुत्तरं लिखत।** **(1×20=20)**

21. नित्य-नैमित्तिक-काम्यकर्माणि।

**अथवा**

कर्माधिकारविवेचनम्।

**अथवा**

धर्मप्रमाणानि।

# A-II/5/1414/22

## तृतीयसत्रार्द्धम्

## पञ्चमपत्रम्

## मीमांसा

**समयः घण्टात्रयम्** **पूर्णाङ्काः 80**

**अ. सर्वे अतिलघूत्तरीयाः प्रश्नाः समाधेयाः।** **(15×2=30)**

1. शास्त्रारम्भसूत्रार्थः कः?
2. समावर्तनशास्त्रस्य विचारशास्त्रारम्भस्य विरोधः कथं परिहर्तव्यः?
3. नारायणद्वयेन रचितः ग्रन्थः कः?
4. उपवर्षाचार्यस्य कालः कः?
5. भवदासः कः? तस्य किं वैलक्षण्यम्?
6. शालिकनाथमिश्रस्य प्रसिद्धः ग्रन्थः कः?
7. मीमांसाशब्दार्थः कथं निष्पद्यते?
8. आचार्यमण्डनमिश्रस्य कालं कृतीः च दर्शयत।
9. वाचस्पतिमिश्रं परिचाययत।
10. पार्थसारथिमिश्रस्य कृतयः काः?
11. खण्डदेवाचार्यस्य वैशिष्ट्यम् उल्लिखत।

**अथवा**

श्लोकवार्त्तिकग्रन्थस्य मङ्गलश्लोकं लिखत।

12. न्यायसुधाग्रन्थस्य कः परिचयः?

**अथवा**

मुरारिमिश्रस्य किं वैशिष्ट्यम्?

13. वेदान्तदेशिकस्य मीमांसाशास्त्रे किं योगदानम्?

**अथवा**

जैमिनीयन्यायमालायाः महत्त्वं किम्?

14. अप्पय्यदीक्षितस्य कः परिचयः?

**अथवा**

अर्थसङ्ग्रहस्य मङ्गलं लिखत।

15. प्रसिद्धाः अर्वाचीनमीमांसकाः के?

**अथवा**

मीमांसाशास्त्रस्य परम्परां लिखत।

**ब. सर्वे लघूत्तरीयाः प्रश्नाः समाधेयाः।** **(5×6=30)**

16. भट्टपादानां कृतीः परिचाययत।

17. न्यायप्रकाशग्रन्थव्याख्यानां विवरणं कुरुत।

18. प्राभाकरसम्प्रदायमाश्रित्य निबन्धं लिखत।

**अथवा**

मीमांसाशास्त्रस्य प्रस्थानं वर्णयत।

19. मानमेयोदयग्रन्थं परिशीलयत।

**अथवा**

अप्पय्यदीक्षितस्य विधिरसायनविषये विवरणं कुरुत।

20. न्यायवेत्ता भगवान् जैमिनिः इति विवृणुत।

**अथवा**

मण्डनमिश्रस्य ग्रन्थसम्पदः वर्णयत।

**स. एकस्य विवरणात्मकमुत्तरं लिखत।** **(1×20=20)**

21. मीमांसान्यायानां उपादेयता।

**अथवा**

खण्डदेवत्रयी।

**अथवा**

धर्मप्रमाणानि।